# जीवन-सागर:

श्री. भि. वेलणकर

म. ग्रं. सं. ठाणे
विषय ७।०५
सं. क्र. १४६८
र.न १९६०

REFBK-0011260
REFBK-0011260

# जीवन-सागर:

मराठी ग्रंथ संग्रहालय, ठाणे. स्थळप्रत
अनुक्रम वि:
क्रमांक नों: दि:

A LYRICAL HOMAGE
TO
M. M. Dr. P. V. KANE

REFBK-0011260
REFBK-0011260

कवि :

श्री. भि. वेलणकर

@ सौ. सुधा वेलणकर, बी. ए.
इंदिरा निवास
भटवाडी, मुंबई ४

●

वेष्टनं : श्री. बाळ ठाकूर

●

मूल्यं १·५० रु.

●

मुद्रक :
श्री. जयराम दिपाजी देसाई
राष्ट्रवैभव छापखाना
मुंबई ४

●

प्रकाशक :
मा. र. सप्रे, कृ. मो. भाटवडेकर
कार्यवाह, ब्राह्मणसभा,
प्रार्थना समाज, मुंबई ४
मकरसंक्रान्ति : दि. १४-१-१९६०

## FROM THE SANDS

A friend, interested in Sanskrit studies, casually inquired of me what I read or did these days for keeping up my acquaintance with that ancient dead language. According to him, once you have gone through the classics and the epics, there is nothing else that you could take up. He was naturally not interested in wading his way through the abstruse scientific treatises on Vedanta, Nyaya, Mimansa, Alankara. Vyakarana, Medicine, Law, Religion, Astrology, Astronomy, etc. He also apparently did not think of re-reading the classics. In other words, he wanted something new and light. My desire to offer tribute to Professor Kane provided an opportunity to furnish a reply to his problem through this composition.

Mahāmahopādhyāya Professor Dr. Pandurang Vaman Kane has devoted his entire life to Sanskrit and other oriental studies. For the last thirty-five years, he has taken up the re-construction of the stupendous history of the धर्मशास्त्र which is now nearing completion. When I first came to know him twenty-three years ago, he had already embarked on this venture. For his unflinching devotion to this cause and other personal qualities experienced by me, I have a deep admiration. I also respect his scholarship. When the Brahmana Sabha of Bombay decided to felicitate him and celebrate the अमृतमहोत्सव in his 80th year, I felt it my duty to pay homage to him and associate myself with the celebrations. The Sabha agreed to allow me to participate. This poem was the result. I have expressed my feelings about him in this composition which I humbly dedicate to him.

The poem depicts the life sketch of Dr. Kane with the background of his earlier generations and with special reference to the Institutions with which he has long been associated. The first three songs take the reader upto his birth. From the 4th to the 8th, his education, work as a teacher and finally his taking up the profession of an advocate have been narrated. His relationship with the High School at Dapoli, the धर्मनिर्णयमण्डल, the Deccan College, Poona, the Mumbai Marāthi Grantha Sangrahālaya, Bombay Branch of the Royal Asiastic Society, Brahmana Sabha and the University of Bombay has been reviewed in songs 9 to 15. Song 16 is devoted to a brief narration about his monumental work, the History of Dharmasāstra. Songs 6, 17 and 18 depict typical incidents in his life illuminating his personality. Songs 19 to 21 refer to his membership of the Parliament in the Rajya Sabha, his recent appointment as the National Research Professor of Indology and other honours won by him. Songs 22 and 23 refer to his family and health. Song 24 attempts an appreciation of his pleasant personality. Song 25 is the concluding prayer. A chronological Index of the events in his life has also been appended at the end for an easy reference to the body of the text.

Each song has a different metre. The list has been printed in the contents. The ancient Sanskrit अक्षरवृत्तs, used for songs 3, 6, 14, 15, 17 and 19, are wellknown. A similar one, less known, is used for song 13. Song 22 uses an अक्षरवृत्त not so far classified but is akin to the known मन्दारमाला. Song 4 uses गीति, the ancient Mātrā metre. Such metres at present are classified under the head जाति and are essentially ताल metres. Jātis used for songs 1, 2, 8, 11, 20, 21, 23, 24 and 25 have a Tāla or a rhythm of 8 matras and are known to belong to the पद्मावर्तनी group. Songs 5, 7 and 9 belong to the Tāla of 7 matras and this group is known as the अग्न्यावर्तनी. Song 12 has a Tala of 6 mātras belonging to the भृङ्गावर्तनी group. Song 18 also belongs to this group though that metre has been used in earlier times. Song 10 belongs to the third major group of metres, namely, the छन्दस् where irrespective of the time quantity, the number of letters in

each line is constant but which does not observe the rigidity of अक्षरवृत्तs as regards the short or long letter in any order. This अनुष्टुभ् of course dates from Ṛgvedic times. ओवी of song 16 which also belongs to this group, dates from medieval times and was popularised by the Marathi Saint poets. The names of metres have been adopted from छन्दोरचना, the monumental work of the late Prof. Dr. M. T. Patwardhan, the distinguished Marathi poet, except for song 22.

I have taken certain precautions to facilitate the flow of narration. The first is to avoid the usual Alamkarika Varnanas in the composition. This lack of embellishments is thus deliberate. In addition, printing of titles of songs with the body of the narration has been avoided. The songs have, however, been duly numbered to facilitate a reference.

I am much indebted to a number of persons for their suggestions. Thanks are also due to the Brahmana Sabha and the Rastra Vaibhav Press for their co-operation in bringing out the book within so short a period at their disposal.

Lastly,

गहनरचना गीर्वाणीयं महाकविलालिता
चरितविषयः शैलप्रायो गतिः स्खलिता मम ।
तदपि विहितः सेवाभावात् क्षमान्वितचेतसां
रसिकविदुषां प्रीत्यै भूयात् स जीवनसागरः ॥

Bombay,
9th January 1960

S. B. VELANKAR.

# PROLOGUE

The treasures of Sanskrit Language will be rendered all the more resplendent and richer by the addition of the present book-let-a metrical bird's eye-view of National Professor M. M. Dr. P. V. Kane's Life—which it has fallen to our fortunate lot to preface and proffer to the lovers of Sanskrit and devotees of Knowledge and Learning.

This versified short biographical sketch has been portrayed by Shri S. B. Velankar—himself a zealous student, ardent lover and reputed scholar of Sanskrit, having bagged almost all the prizes and scholarships for Sanskrit during his career at the Bombay University—and contains songs, composed in no less than 25 varied metres, dealing with several interesting and instructive facts of Dr. Annasaheb Kane's career. The lyrical quality of the work, which smacks all along of the wellknown saying—गुणी गुणं वेत्ति न वेत्ति निर्गुणः will be readily noticed even by a casual reader.

In conclusion, while expressing a firm belief that this जीवनसागर will be a constant source of inspiration to students of Oriental and Indological Research in particular and to the explorers of the wild depths of the Ocean of Learning & Erudition in general, and will also serve as a helpful specimen to the budding poets itching to batter their brains against the Himalayan edifice of Sanskrit Prosody, and while giving vent to our warm appreciation and heart-felt thanks to Shri S. B. Velankar for this most opportune and landable work and to the Rashtra Vaibhava Press for their neat & prompt printing, we cannot refrain from saying—

श्रीरामो निपुणः कविश्च मिलिता सर्वे गुणग्राहकाः
लोक हारि च पाण्डुरङ्गचरितं गीर्वाणभाषान्वितम् ।
ज्ञाने सत्कृतिसेवयोस्तु निरता नित्याभियुक्ता "सभा"
अस्मद्भाग्यवशादयं समुदितः सर्वो गुणानां गणः ॥

M. R. Navangule
*Chairman*

N. V. Modak
*President*

M. R. Sapre
K. C. M. Bhatawadekar
*Jt. Hon. Secretaries*

## गीतानुक्रमः ।


| | | छन्दः | | पृष्ठं |
|---|---|---|---|---|
| १ नमनम् । | ... | ( चन्द्रकान्त ) | ... | ११ |
| २ घनिष्ठा जामदग्न्यकरुणा । | .... | ( चन्द्रकला ) | ... | १२ |
| ३ जन्म । | .... | ( उपजाति ) | .... | १२ |
| ४ शैशवम् । | .... | ( गीति ) | .... | १४ |
| ५ शिक्षकः । | .... | ( जीवकलिका ) | .... | १४ |
| ६ विद्यादरः । | .... | ( शार्दूलविक्रीडित ) | | १६ |
| ७ देवतेच्छा । | .... | ( मध्यरजनी ) | .... | १७ |
| ८ द्रव्यमिदं विन्दानि कुतः । | .... | ( उद्धव ) | .... | १८ |
| ९ आनृण्यम् । | .... | ( वल्लभा ) | .... | १९ |
| १० धर्मनिर्णयमण्डलम् । | .... | ( अनुष्टुभ् ) | .... | १९ |
| ११ दक्षिणविद्यालयम् । | .... | ( स्नेहसागर ) | .... | २० |
| १२ ग्रन्थसङ्ग्रहालयम् । | .... | ( पुष्पिता ) | .... | २१ |

| | | | | | |
|---|---|---|---|---|---|
| १३ | रॉयल एशियाटिक सोसायटी | .... | ( वीणावती ) | .... | २२ |
| १४ | ब्राह्मणसभाहितचिन्तकः। | .... | ( शिखरिणी ) | .... | २३ |
| १५ | विश्वविद्यालयसहायः। | .... | ( भुजङ्गप्रयात ) | .... | २३ |
| १६ | प्रणेता धर्मशास्त्रेतिहासस्य। | .... | ( ओवी ) | .... | २४ |
| १७ | महतां मनोमहः। | .... | ( वैतालीय ) | .... | ३० |
| १८ | पाण्डुरङ्गदर्शनम्। | .... | ( दिण्डी ) | .... | ३२ |
| १९ | राज्यसभासदस्यः। | .... | ( वसन्ततिलका ) | .... | ३३ |
| २० | राष्ट्रीयप्राध्यापकः। | .... | ( भूपति ) | .... | ३३ |
| २१ | सन्मानान्तरम्। | .... | ( हरिभगिनी ) | .... | ३४ |
| २२ | कौटुम्बिकम्। | ... | ( अनुमन्दारमाला ) | | ३६ |
| २३ | अस्वास्थ्यम्। | .... | ( पादाकुलक ) | .... | ३६ |
| २४ | आन्तरदर्शनम्। | .... | ( स्वर्गसौन्दर्य ) | .... | ३८ |
| २५ | याचना। | .... | ( मोहिनी ) | .... | ३९ |

महामहोपाध्याय



डॉ. **पाण्डुरङ्ग वामन काणे,**

एम्. ए., एल्एल्. एम्., डी. लिट्.

पदविलसितं प्रादुर्भूयाद् यशोगिरिदर्शने
प्रसरतु कुतः स्फूर्तिप्रस्थं विना प्रतिभासरित् ।
विहितमथ मे मूलस्थाने प्रतिन्यसनं गिरां
विनयरचितां स्वीकुर्यात्स प्रणीतिमिमां ततः ॥

श्रीरामः ।

मराठी ग्रंथ संग्रहालय, ठाणे. स्थळप्रत
अनुक्रम ........ वि: ........
क्रमांक ........ नों: दि: ........

# जीवन-सागरः।

मराठी ग्रंथ संग्रहालय ठाणे
ग्रं. क्र. ११२६०

१

नमोऽस्तु ते श्रीकोङ्कणदेवि स्थिरेशसह्यसुते
नमोऽस्तु ते श्रीभार्गवमाता रत्नाकरकान्ते ॥
उत्तरदिशि तव सखी जलवहा सावित्री रमते
दक्षिणदेशे गोवनभूमिः पदसेवां कुरुते ॥
सह्यगृहात् संगृह्य निर्झरा वार्षिकजलभारं
समर्पयन्ते सागरचरणे कन्याधनसारम् ॥
जीवनहीनः सुतसंघातः कुबेरदिक्शरणः
निर्जलनिर्धनवसुधायां नच पुनराशाकिरणः ॥

दैवतमेतत्परशुधारिणस्तत्कुलजा मान्याः
दिगन्तकीर्तिप्रस्था जाता जनसेवाधन्याः ॥
तेषामेको भवत्परिचितो वर्षाशीतियुतः
जमदग्निजनुस्तेजःसर्गो वाक्शरशास्त्रयुतः ॥
तच्चरितोद्गायने प्रोद्यतो नमामि गुरुपादौ
भूदेवीं प्रणमामि च भार्गवजननीं नत आदौ ॥
नमोऽस्तु ते श्रीकोङ्कणदेवि क्ष्माभृत्सह्यसुते
नमोऽस्तु ते श्रीरत्नप्रभवे रत्नाकरकान्ते ॥

२

आंग्लराज्ययन्त्रे भूमिरार्यावर्ते दीना
शतकविंशतिः सा न पूर्णा त्वेकेन ह्यूना
ख्रिस्तपरा गणना कालपुरुषस्य यदि प्रकृता
अनन्तता तस्य प्रथिता भारतजैर्विदिता ॥
स्वातन्त्र्यविनाशात् स्वतन्त्रत्वबीजसंभवनं
खण्डिताद्धि वृक्षात् संभवेत्पुनर्वृक्षजननम् ॥

स्वराज्यमन्त्राणां द्रष्टा लोकमान्यतिलकः
पुनरुत्थानार्थे प्रस्थितः केसरिनादयुतः ॥
समाजकार्याणां आगरकरा धुरि प्रहिताः
न्यायालयशुद्धौ रानडे नाकेशैर्विहिताः ॥
भाषाया दीपो विष्णुशास्त्रिभिः समुज्ज्वलितः
संदीपनकार्यं धर्मशास्त्रस्य पुनर्हि कृतः ॥

प्रज्वलन् स्वधर्मः समाजं धारयेत् सविभवं
ग्लानौ सर्गः स्याद् भगवतो, गीतं तेनैवम् ॥
प्रेषयामि कमितः सचिन्तो देवपतिर्द्दष्टः
प्रोक्तं श्रीपतिना परशुरामोऽत्र मया पृष्टः ॥
हृष्टो देवेन्द्रो रुष्टा अधर्मजीविजनाः
तुष्टा भारतभूर् घनिष्ठा जामदग्न्यकरुणा ॥

३

खेडप्रदेशे रमणीयभूमिः
सरित्तटस्था द्विजवासिनी च ।
तत्रैकपल्ली मुरडेंमुनाम्नी
विद्वज्जनानामुटजैः पुनीता ॥

उच्चाधरव्यक्तिरभिप्रणीता
स्वधीतविद्याविषयेऽत्र नूनम् ।
गृहैर्धराकुक्षिनिवेशितस्तैः
शैलीयदेशे विषमे समंतात् ॥

काणेकुटुम्बं विधिकर्मनिष्ठं
ज्ञानार्जनालंकृतिभिर्विशिष्टम् ।
सुसंभृता गोधनसंपदिष्टा
ग्रामे कुलस्य प्रथिता प्रतिष्ठा ॥

तत्राभवच्छंकरमिश्रपादो
ज्योतिश्चिकित्सादिविदां धुरीणः ।
मातापि तस्य प्रतिकारशक्ता
पेंढारसेनामवमानयन्ती ॥

तस्यात्मजोऽभूत्समुदारकीर्तिः
स वामनो नाम मनोज्ञकान्तिः ।
कुलेन शीलेन सुदर्शनेन
विद्याधनेनापि युतो गुणाढ्यः ॥

खदिग्वसुक्ष्मागणिताङ्ग्लवर्षे
प्रासूत तेजः सुतमस्य भार्या ।
मातुर्गृहे पुण्यपदे मुहूर्ते
हिताय सर्वस्य प्रभाववन्तम् ॥

वासिष्ठीतटशैलके परशुरामक्षेत्रपुण्यावनौ
मासे चैत्रवरेऽत्र चित्तपुलिनग्रामान्तिके प्रोच्छ्रिते ।
प्रातर्भास्करवर्चसः परशुरामस्यांशतस्तेजसो
धन्या मङ्गलपाण्डुरङ्गजनने भूः कोङ्कणप्रान्तिका ॥

४

पौरोहित्यं वामनभट्टैरुपजीविकार्थमभिजुष्टम् ।
अष्टादशवर्षपरं चित्तं तेषां न तत्र संतुष्टम् ॥

यजमाना धर्मपरा मन्यन्ते स्म न पुरोधसं बहुशः ।
संमानो गुरुयोग्यः कर्माचरणे न वा तथा सुयशः ॥

धीमाँञ्ज्ञानापन्नो विवेचकः स्वाभिमानसंपन्नः ।
सहते न दशामेतामपि द्विजो निरशनत्वमापन्नः ॥

कर्वेमहर्षिमिश्रा गणितविशेषज्ञदीक्षिताः प्राज्ञाः ।
यस्य सहाध्यायिजना गतानुगतिका भवेन्न तत्प्रज्ञा ॥

न्यायालयनियमानां प्रतिषेधानामशेषधर्माणाम् ।
कृत्वाध्ययनं भूतः सत्यप्रतिपादको हि दीनानाम् ॥

पारंपरिकाध्ययनं मा भूत्पुत्रस्य निश्चितं तेन ।
नियतिर्बलीयसी सा द्वारं प्रगतेरपावृतं येन ॥

वामनभट्टैर्विहिता वसतिर्नयसद्मकार्यसौकर्यात् ।
दापोलीसुग्रामे सुखं निदाघे हि यत्र शीतत्वात् ॥

धर्ममठः ख्रिस्तीयस्तत्रासीच्छिक्षणप्रदानरतः ।
सप्तदशाब्दस्यास्य च माध्यमिकाध्ययनपूर्तिरत्र ततः ॥

लाडघरग्रामस्था बालानां बालिका सुभद्राऽतः ।
पत्नीपदे नियुक्ता सज्जश्चक्रद्वयेन पान्थरथः ॥

५

परीक्षा सा प्रवेशार्थे महाविद्यालये, तीर्णा
युवासौ सप्तदशवर्षो विकल्पालिः समास्तीर्णा ॥

मनीषा पैतृकी प्रबला परीक्षा न्यायकार्यस्य
समुत्तीर्यानुसर्तव्या धुरानेन स्वकार्यस्य ॥

विना द्वाविंशतिं वयसः परीक्षैषा न चानुमता
इति ज्ञाते परां शिक्षां ग्रहीतुं कामनोद्भूता ॥

अमुं ते दीक्षिता ऊचुर्गणितविषयो महाध्यायः
खगोलानामितः सर्वाः परिज्ञेया गतिस्थितयः ॥

न धर्माचार्यतायां स्यात्प्रतिष्ठैवं परा विहिता
अतोऽन्यत्रास्य चाप्रीतिः सुरैः पूर्वं हि संनिहिता ॥

ततो गीर्वाणभाषाया विनिर्णीतस्तदध्यायः
प्रवेशोऽध्यायिना कष्टं महाविद्यालये लभ्यः ॥

समुद्भूतो गुरुर्व्याधिः पुरेषु प्लेगनामायं
कथं विद्यालयेऽध्यायः परीक्षा वा कथं चेयम् ॥

ज्ञानधामाब्धितीरे तत् स्थितं बिल्सन्नभिख्यानं
तदा मुम्बापुरे सिद्धं तदाचार्यैर्विदित्वेदम् ॥

उपस्थित्या विना दत्तः प्रवेशो मन्दिरे ह्यस्य
गुणं वेत्तीह गुण्येवं कथं मान्यं तदन्यस्य ॥

महाविद्यालये जाता परीक्षा प्रथमवर्षीया
वरेण्यां शिष्यवृत्तिमयं जयति गीर्वाणभाषायाम् ॥

द्वितीये वत्सरे भूयस्तदेवैवं विनिष्पन्नं
चतुर्थे भाउदाजीयं जितं नैपुण्यशिखरमिदम् ॥

पुनः षष्ठे च वेदान्ते जितं झालाभिधानीयं
स्थितो गीर्वाणविज्ञाने धुरीणो विश्रुतश्चायम् ॥

नयविधिप्रणिधिदीक्षायाः समुत्तीर्णादिमा श्रेणिः
वयोद्वाविंशतीयेऽब्देऽपि शिक्षाक्षेत्रगा प्रीतिः ॥

जितो ह्यध्यापनाम्नाये विशिष्टस्थानसन्मानः
परीक्षे द्वे समुत्तीर्णे प्रदेशेऽस्य क्रमः प्रथमः ॥

जनकजाद्रौपदीकालप्रबन्धो नीतिरीतिपरः
प्रणीतो, मंडलिकदानं जितं, न तु काञ्चनीयपटः ॥

जितोऽयं तु द्वितीयेऽब्देऽप्यलंकारेतिहासेन
अभूदध्यापकः, प्राप्ता मनीषितसंपदा तेन ॥

गतो मुम्बापुराद् रत्नागिरीप्रान्तं प्रसिद्धं तं
यतो नररत्नसंभूतिः स्वदेशोद्धारिका रीतिः ॥

मतं तेनायुषि प्राध्यापकस्थानं वरं चैवं
सुरैरपि धर्मशास्त्रस्येतिहासे योजितश्चायम् ॥

६

कालेनैष कुटुम्बपोषणरतो रत्नागिरीभूमितः
शिक्षाप्रीतिवशात् प्रमोहनगरीं मुम्बापुरीमागतः ।
मुख्याध्यापक एकदा समवदच्छात्रोऽस्ति कश्चिन्मम
तस्मै देय इतो विशेषविनयो गीर्वाणवाणीपरः ॥

अन्येद्युः परिनिश्चिते हि समये तच्छिष्यगेहं गतः
शिष्यो निद्रित एव कोपि न पुनर्वा स्वागतं भाषते ।
छात्रं तत्र जगाद संयतमनाः कालव्ययं नोत्सहे
तत् त्वं धाम ममैहि; सौख्यमुभयोर्जायेत चैवं परम् ॥

नेदं छात्रपिता वचो रुचिकरं मेने धनोन्मूढधी-
रेतस्मै तनयेन कोपनपरः संदेशितं प्राहिणोत् ।
एतव्यं मम गेहमेव भवता शुल्कद्वयं स्यात्तव
बालेनात्र निरूपितं हि सकलं पित्राज्ञयैतस्य च ॥

आलोच्यैनमनेन धीविरहिणं प्रत्युक्तमस्मै पुनः
नित्यं संविहितं त्वयात्र पठनं श्रेयस्करं सर्वथा ।
काङ्क्षे नाहमरे परं द्विगुणितं शुल्कं, ममानेन किम्
कुर्या अध्ययनं यथेष्टमिह तत् संतोषतस्त्वं सदा ॥

आढ्यो गर्वित आत्मजं पुनरहो संप्रेषयामास तं
दास्ये शुल्कमहं चतुर्गुणमतो मद्गेहमागम्यताम् ।
विद्यामानपरः सहेत न कदा विद्यावमानं यतः
आहैतन्न पुनः सहस्रगुणितैः शुल्कप्रदानैरपि ॥

७

शारदा देवी सचिन्ता     शिक्षकोऽयं पाण्डुरङ्गः
धर्मशास्त्रोत्थापनार्थे     योजितस्यार्थस्य भङ्गः ॥
शिक्षणव्यवसायनिरतो     भार्गवांशस्तृप्तचित्तः
किं कृतं किं कार्यमथवा     व्यतिकरः पूर्वानवाप्तः ॥
तत्र तावन्नारदर्षिः     स त्रिकालज्ञान्युपेतः
संभ्रमं परिवीक्ष्य देव्याः     तां समाश्वास्यैष विगतः ॥
कलहसंतोषी स मान्यो     भुवनमवतीर्णः प्रभावी
शिक्षणप्रान्ताधिकारे     कोऽपि युक्तोऽभून्मनस्वी ॥
तेन कारितवान् महर्षिः     कंचिदन्यायं बलेन
वीजितः सत्कोपवह्निः     भृगुजतेजःप्रत्ययेन ॥
बीजतो वृक्षोद्भवः स्यात्     कालचक्रारक्रमेण
ज्ञातवृत्ता सुप्रसन्ना     देवता चिन्तालयेन ॥

कोपवृत्तिस्त्वेष नासीन्     नाविवेकी वा तथैषः
मार्जनेऽन्यायस्य सिद्धः     स्यात् कुतस्तद्भीतिलेशः ॥
शासकैर्विज्ञापितोऽयं     सत्यमन्यायः प्रवृत्तः
मार्जने प्रयतामहेऽतः;     नैष साक्षी चावमृष्टः ॥
धर्मशास्त्रस्यान्तिमेऽयं     जात उत्तीर्णस्तदैवं
सम्यगध्ययने सलीलं     दर्शयन् बुद्धिप्रभावम् ॥
सत्वरं प्राध्यापकत्वे     शासकैर्युक्तस्तथायं
निश्चितं त्वेतेन तावत्     स्यां नयप्रतिपादकोऽहम् ॥

नारदं पप्रच्छ देवी विस्मरेन्नवतारकार्यं
सस्मितं स प्रत्यवोचत् मा भयं नैतद्धि भाव्यम् ॥
सर्वसेवातः स्वतन्त्रः प्रीतिरध्ययनेऽस्य नित्या
नियतिरीतिरतर्किंतेयं देवतेच्छैवात्र सत्या ॥

८

सदने नच सधने जननं द्रव्यमिदं विन्दानि कुतः ॥

नयगेहे प्रतिपादार्थे उत्सहते ननु युवकोऽयं
शिक्षकस्य सेवावृत्तिश् चोत्सार्या परमावश्यं
व्यवसायाङ्गीकारार्थे धनसाह्यं न तु परिहार्यं
को दद्यादेतत्साह्यं द्रव्यमिदं विन्देय कुतः ॥

तत्प्रमाणपत्रं प्रथमं पञ्चशतकमुद्रासाध्यं
पूर्वसूरिचरणाश्रयणं नूतनैर्निरन्तरमान्यं
मुद्रिता बाणभट्टस्य कादम्बरी सनिजभाष्यं
पञ्चशतार्जनसंतुष्टः नयनिर्बन्धपटुः श्रान्तः ॥

सुगृहीतनामधेयास्ते निर्बन्धपण्डिताः ख्याताः
दाजीसाहेब खरे तान् सोत्साहमयं समुपसृतः
न्यायं प्रतिपादितुकामः आशीर्वच आप्तुं समितः
वैसिद्धतापरिपूर्णः निजकष्टार्जितधनसहितः ॥

तैः पृष्टं 'कति धनचयनं' पञ्चशतं विज्ञापितवान्
'नैतेनालं' ते जगदुर् 'द्विसहस्रं विचिनोतु भवान्
स्तम्भितः समास्ते युवकः दिङ्मूढो मन्दं सृतवान्
शैलस्य शिखरमतिदूरं द्रव्यमिदं विन्देय कुतः ॥

नियतिकार्यमज्ञेयं तद् ग्रन्थलेखनेऽभ्यासक्तः
गद्यावलिरचना तद्वत् साहित्यदर्पणः प्रथितः
शारदा सहायीभूता धनयशोवृतः संवृत्तः
न प्रश्न इतः संभावी द्रव्यमिदं विन्देय कुतः ॥

अनुक्रम २४००८ वि: ... क्रमांक ... नों: दि: ...

निर्बन्धपाठशालां तां प्राज्ञः परिसंचालितवान्
विधिविद्यायतने च पुनः प्राध्यापनकार्यं वृतवान्
सुप्रतिष्ठिते सोपाने मङ्गलारोहमधिकृतवान्
यूनां दिग्दर्शनकामः द्रव्यकीर्तिसंचयनमितः ॥

९

विद्यामृतेन स्यान्महान् प्रायो नरो धरणीतले
जननीपयःपानं यथा सुदृढं दधाति शरीरिणम् ।
अत एव विद्यामन्दिरं तुलितं बुधैर्मात्रा समं
अनृणं विधातुं यत्यते स्वात्मानमत्र स्वल्पशः ॥

दापोलिपल्लीस्था हि वन्द्या पाठशालैतस्य या
परधर्मसंचलनादसौ स्वजनव्यवस्थायां हृता ।
अभवद् धुरीणो मण्डले, रचिता नवीनपरम्परा
अद्यापि भक्त्या वन्दने मिलितौ करौ विनतात्मनः ॥

यद्यद् हिताय भवेत्, कृतं तत्पाठशालायाः कृते
अनृणः स, ऋणिनी साधुना विद्याधुनी परिवाहिनी ।
ये छात्रशिष्यगणास्ततो भुवने प्रगच्छेयुः पुनः
संस्थोपकृत्यानृण्यमेतेऽस्माल्लभेरन् सर्वथा ॥

१०

श्रुतिप्रणीतमार्याणां स्मृतिभिश्चोपबृंहितम्
सूत्रैर्व्याख्यातमेतं च धर्मं भारतजा विदुः ॥

कालात्ययेन रूढीनां संकरेण स्वरूपतः
स्थानाचारप्रभेदैश्च दुर्ज्ञेयः समजायत ॥

प्रतीता धर्मविषये ह्युपेक्षाऽतः स्वभावतः
अपेक्षितः सर्वजनैर्धर्मशुद्धिक्षमः प्रभुः ॥

मनीषाऽभूत्स्थापयितुं धर्मनिर्णयमण्डलम्
गुरुनेतृत्वधन्येन सफला विहिता हि सा ॥

उद्यमप्रियता तद्वद् धर्मशास्त्रनिमज्जनं
धर्मादरः सूक्ष्मबुद्धिर्बान्धवानां हितैषणा ॥

अस्य सर्वमिदं सिद्धं निरहंकारसंयुतं
तस्मात्प्रस्थापितं जातं धर्मनिर्णयमण्डलम ॥

विवाहोपनयादीनां विधिः शास्त्रेषु शोधितः
प्रकाशितश्च लोकांना हिताय सुखकारिणे ॥

साध्यं हि धनहीनानां धर्मकार्यमतः शुचि
निर्दोषं शास्त्रपूतं च विनायासेन वाञ्छितम् ॥

धन्या माता जनित्वैनं धर्मसंशोधकं वरम्
धन्या भूमिस्तथा प्राप्य सुपुत्रं धर्मधारणम् ॥

११

समापितं शासकैः श्रूयते दक्षिणविद्यालयम्
गता किल सकला विद्या लयम्
यत्स्वराज्यकाले पुरा द्विजगणार्जितं
दक्षिणाधनं परकीयनृपै रोधितं
विद्यालयं च तद्धनात् प्रतिष्ठापितं
समापितं ननु कथं शासकैरेतद्विद्यालयं
कथं किल प्रयातु विद्या लयम् ॥

ये पूर्वच्छात्रा विद्यालयशिक्षिताः
स्तम्भिता यदा वार्तेयं श्रुतिमागता
किं परम्परेयं वृथैव परिखण्डिता ?
न रोचते कस्मा अपि पिहितं दक्षिणविद्यालयं
शासकान् को नु वदेन्निर्भयम ॥

आगताः सकाशे चास्य योजनापराः
श्रुत्वा तानवदन्मतिरस्तु प्रस्थिरा
कार्यमिदं सफलं कुर्यां पण्डितवराः
समाश्वासिता गताः पण्डिताः सुखेन निजनिलयं
उद्यमं दीर्घं कृतवान् स्वयम् ॥

अनुकूला प्रथमं शासनसंस्था कृतः
प्रश्ननिर्णयः स न्यायमन्दिरे ततः
जयकरः सहायो यत्नैरस्यागतः
पूरोत्पीडे काष्ठं प्रभवेत् कथं निरोध्दुं रयं
यशःश्रीः समागता हि स्वयम् ॥

विश्वस्तनिधिरयं प्रशासकैः संमतः
मन्दिरोद्धाटने पुनर्निश्चयः कृतः
उदितोऽपि स मङ्गलदिवसः शीघ्रं ततः
विराजते वैभवेन संशोधनाय विद्यालयं
स्थापिता सकला विद्या स्वयम् ॥

१२

ग्रन्थसङ्ग्रहालय ! प्रीतितो नमोऽस्तु ते ॥

मुंबई–महापुरे
सकललोकशंकरे
ग्रन्थसंग्रह ! त्वयाऽज्ञता जने विनाश्यते ॥

वर्षषष्टिकालिकं
अस्य साह्यदायकं
पार्श्वतः स्थितं सदा व्यक्तिमत्त्वमत्र ते ॥



११२८०

अस्य यत्नतो न्विदं
मातृवाग्यशःप्रदं
शोधनं चिकीर्षितं सोद्यमं विधीयते ।।

अपि च शैशवे तव
मन्दिरं सुजीर्णमेव
तत्पुनर्नवीकृतं कथय केन तव कृते ।।

स्थापयस्व शाश्वतं
स्वान्तरे समाहितं
तं त्वदीयहितरतं, तत्पदे नमोऽस्तु ते ।।

१३

समाजेऽत्र पौर्वात्यविद्यामृतं
प्रसंशोधनीयं प्रयत्नैः सदा ।
सदस्यास्त एवं नगर्यां स्थिताः
समुत्थाप्य शाखां सुखाध्यायिनः ।।

स तेषां महानग्रणीः कार्यतः
सदस्यो ह्युपाध्यक्षतां प्रापितः ।
न संस्था प्रगत्याः पदे यायिनी
विना तच्छ्रमैर्ज्ञातमेतद् बुधैः ।।

तथैतं च राज्याश्रयं प्रार्जितं
समाजेन तस्य प्रयासैरितः ।
सुवर्णीयकाणेऽभिधानं पटं
प्रदत्ते त्रिवर्षं च संस्थाधुना ।।

सदा साह्यकारी सखासौ स्थितः
प्रवर्धेत संस्था समाजोन्मुखी ।।

मराठी ग्रंथ संग्रहालय ठाणे. स्थळप्रत.
अनुक्रम
क्रमांक ... नों: दि.

१४

द्विजैर्विद्यावद्भिर्धनविरहितैः संगतमतैः
दिनान्ते विश्रान्तौ पटुवचनसंभाषणपरैः ।
समाहारे पूर्वं ननु विरचिता रीतिरिह या
ततः संस्था जाता जनहितपरा ब्राह्मणसभा ॥

सदस्यत्वेनेतः परिगमयितोऽध्यक्षपदवीं
ततो विश्वस्तत्वं विनिहितममुष्मिन् कृतिपरे ।
शिशुत्वात्प्रौढत्वं समधिगतवत्यस्य सततैः
प्रयत्नैः संस्थेयं स्वदुहितृसमं लालनवती ॥

तथारब्धं कार्यं विनयविषये संस्कृतिपरं
पुनः प्राचीनानां विचरितयुगं स्यादवगतम् ।
सुवर्णख्यातेयं प्रियभरतभूवैंभवयुता
पुनर्भूयात्तद्वत् कनकसमविद्याविभविनी ॥

महारम्भोऽस्यायं न तु बुधमते दुर्घट इतः
तथा संस्था, धुर्योऽपि हि सुमहितो मान्यपुरुषः ।

१५

अधीतोच्चविद्या हि मुम्बानगर्यां
विकासो मतेर्विश्वविद्यालयेऽत्र ।
अतो निश्चितं तेन तत्कार्यसेवा
स्वहस्तेन कर्तव्यबुध्या वितान्या ॥

परीक्षाविधाने प्रदायी गुणानां
तथाभ्यासयन्त्र्याः समित्याः सदस्यः
सजुष्टं कृतं तत्र, जातो नियुक्तः
तथायं च कालेन संस्थोपयन्ता ॥

इयं षष्टिवर्षाधिकस्नेहरज्जुः
सदा कालतो वर्धते चोपचित्या ।
परं स्नेहलो मार्गदर्शी सखासौ
स्वयंभूः स्थितो विश्वविद्यालयस्य ॥

१६

यदा यदा भवति ग्लानिः
धर्मस्य तथा कर्महानिः
तदा स्थिरीकर्तुं कार्याणि
परमेशावतारः ॥

यदाङ्ग्लदेशनिवासिनः
सर्वभौतिकवादिनः
भारतवर्षे प्रशासिनः
धर्मशास्त्रविलोपः ॥

कथं हि विधयो विहिताः
आश्रमवर्णादिव्यवस्था
न ज्ञात्वा सर्वा ह्यनवस्था
प्रसक्ता सत्समाजे ॥

यद्यत् स्वकीयं तत् तत् त्याज्यं
पाश्चात्यं च सकलं ग्राह्यं
राज्यकर्तॄणामनुकार्यं
श्रेष्ठतायै सर्वथा ॥

स्वकीयं किमपि नाधीतं
अन्धपरम्परया गतं
भौतिक-प्रगत्यां वेदान्तं
स्मरन्तो मता मूढाः ॥

परकीयो वरमाचारः
परकीयः श्रेष्ठो विचारः
परकीय एवमुच्चारः
वृतं मोक्षसाधनम् ॥

स्वराज्यसूर्यः संनिधेयः
अधर्मान्धःकारोऽयं हार्यः
अतोऽरुणरथोऽसौ भव्यः
ज्ञानरूपः प्रेरितः ॥

स्वाभिमानः स्यात्प्रजागृतः
स्वातन्त्र्यनिर्धारे प्रदीपः
अतोऽयं महान् संदीपितः
धर्मशास्त्रेतिहासः ॥

धर्मशास्त्रमहासागर
कथं तमुल्लङ्घयेन्नरः
ततो भूत्वा करुणाकरः
विरचिता नौरियम् ॥

अतश्च्यवेन्नु न्यूनगण्डः
धर्मशास्त्रनिन्दापाखण्डः
धर्मप्रकाशः स्यादखण्डः
शतकानुशतकम् ॥

प्रथमे खण्डे निरूपणं
धर्मशब्दस्येदं व्याख्यानं
कुतश्च धर्मप्रभवनं
विस्तरेणावेदितम् ॥

ये धर्मशास्त्रप्रणेतारः
तथा च धर्मसूत्रकाराः
स्मृतिपुराणपरम्परा
समग्रा निरूपिता ॥

रामायणं महाभारतं
भाष्य–टीका–निबन्धजातं
यत्र धर्मशास्त्रमाख्यातं
परामृष्टं वाङ्मयम् ॥

इतिहासस्य साधनानां
श्रुतिस्मृतिपुराणादीनां
कालखण्डः परस्पराणां
यथामूलं निश्चितः ॥

गौतम–नारद–हारीताः
विष्णु–कण्व–शङ्खलिखिताः
आपस्तम्ब–मनु–वसिष्ठाः
बृहस्पति–सुमन्तू ॥

काव्य–कश्यप–बौधायनाः
गार्ग्य–भारद्वाज–च्यवनाः
बुध–देवल–जातूकर्ण्याः
अङ्गिरा–ऋष्यशृङ्गौ ॥

व्यास–पुलस्त्य–पराशराः
यम–दक्ष–विज्ञानेश्वराः
अत्रि–मेधातिथि–श्रीकराः
लौगाक्षि–हलायुधौ ॥

बहुरत्नानि रत्नाकरे
नामग्रहणव्यतिकरे
न तान्यूनानि तेजःसारे
भास्वन्ति निरन्तरम् ॥

द्वितीये खण्डे निरूपणं
वर्णाश्रमधर्मसंख्यानं
शास्त्राधारमहाचयनं
समारब्धं प्रयासैः ॥

कथं भवन्ति पुरुषार्थाः
तथा कथं संस्कारसंस्था
दैवतायतनप्रतिष्ठा
दास्यवृत्त्यस्पृश्यते ॥

सती-वेश्या-नियोगाचाराः
भोजनोपाकर्मप्रकाराः
वानप्रस्थ-संन्यासकराः
विधयः प्रदर्शिताः ॥

दर्शपूर्णमासादियज्ञाः
पशुबन्धाग्न्याधानसंज्ञाः
अग्निचयनपितृयज्ञाः
दानादि निरूपितम् ॥

वैश्वदेवादिदेवयज्ञाः
तथैवान्ये मनुष्ययज्ञाः
इतरे सर्वे महायज्ञाः
प्रोक्ताः संपूर्णतया ॥

तृतीये खण्डे निरूपणं
राजन्यधर्माविष्करणं
दत्तकादीनां प्रकरणं
कथितं विस्तारतः ॥

चतुर्दश हि धनमूलाः
चत्वारश्च पारुष्यमूलाः
दोषास्तथा विवृताखिला
प्राचीना न्यायसंस्था ॥

विधि–निर्बन्ध–शिष्टाचाराः
दायभागस्त्रीधनपराः
ऋणदानग्रहणप्रकाराः
प्रपञ्चिताः सूक्ष्मतः ॥

चतुर्थे खण्डे विषयजातं
पातकं तपः प्रायश्चित्तं
कर्मविपाकादि कलितं
शास्त्राधारेण सर्वम् ॥

अन्त्येष्टि–श्राद्धादिप्रकाराः
तीर्थयात्रासमुदाचाराः
कर्मविकर्मादिविचाराः
प्रस्थापिताः सकलाः ॥

पञ्चमः खण्डो न च पूर्णः
एको भागो मुद्रितोऽपूर्णः
व्रतोत्सवानां प्रवितीर्णः
विषयो महानसौ ॥

व्रतोत्सवा नु यथातिथि
महाशिवरात्रिः संक्रान्तिः
तथा च सर्वेषां समाप्तिः
संविधानं पुण्यदम् ॥

ऋग्वेदकालतः प्रारम्भः
ज्ञानरञ्जनसुसमृद्धः
अयं निरूपणप्रबन्धः
संतोषाय सर्वेषाम् ॥

कालमुहूर्तादिव्याख्यानं
सर्वपञ्चाङ्गप्रकरणं
फलज्योतिषादिविज्ञानं
आभाषितं सर्वशः ॥

दर्शयिष्यति शास्त्रजातं
मनुजधर्मे चानुस्यूतं
स्थापयिष्यति वेदान्तं
भौतिकजीवनेऽपि ॥

यथाक्रमं च महारम्भः
पूर्णो दृश्येत पर्वताभः
अस्तु तत्र दीर्घायुर्लाभः
सुदैवाय सदा नः ॥

लक्षाधिकपङ्क्तिरचना
सहस्रैः पृष्ठानां योजना
एवं वचनैर्न गणना
कार्यमाहात्म्यस्य हि ॥

बहून्यस्य ग्रन्थरत्नानि
अयं तु तेषां मेरुमणिः
जीवनकार्येण जननी
धन्यप्रसवा किल ॥

अस्मै नमो महोद्यमाय
निष्ठापूर्वकृतकार्याय
सम्यक् सर्वेषां विज्ञानाय
दीप्तं धर्माग्निहोत्रम् ॥

१७

" भवने भवतोतिऽवाहिताः
कति मासाः सुखदा मयाधुना ।
व्रजनं मम छात्रमन्दिरे
पठनार्थे न तु कष्टशङ्कया ॥

अपि किंचन शुल्ककाञ्चनं
भवता संप्रति तात गृह्यताम् । "
वचनं गृहिणे सदुक्तवान्
विनयेनैष चरित्रनायकः ॥

शतकं कनकात्मकं तदा
ननु कालस्य समापितं न च ।
निरपेक्षतया सहायतां
कृतवन्तो मनुजाः परस्परम् ॥

स गृही पितृवत्सलस्वैरः
प्रतिवाचं निजगाद सस्मितम् ।
" वसतिं कृतवान् भवानतो
न हि काङ्क्षेऽहमनुग्रहान्तरम् ॥ "

अमुना त्वनुयाचितः पुन-
र्न्यवदत् " संकटकाल आयति ।
समितो हितबोधलिप्सया
विमुखो मा व्रजतात् सुतो मम ॥ "

सजवं सकलं विनिःसृतं
बत संवत्सरविंशतिद्वयम् ।
गृहिणस्तनयः समागतो
नयबोधाय विनम्रयाचकः ॥

तनयः स च पाण्डुरङ्गतः
सुखसंपादितहेतुरब्रवीत् ।
अधुनोपकरोतु मे भवान्
कतिशुल्कग्रहणेन साह्यदः ॥

तत उत्क्रमनेन सस्मितं
बत शुल्कं समुपार्जितं पुरा ।
ग्रहणीयमतो न किंचन
भवतस्तर्हि सुखेन गम्यताम् ॥

क्व महन्महतां मनोमहः
क्व च मोहो मलिनः पदे पदे ।
असमानिततुङ्गता हृदो
न च सामान्यजनेष्वपेक्ष्यते ॥

१८

पण्ढरीपतिविठ्ठलः कृपासिन्धुः
दर्शनार्थं परमपावृतं द्वारम् ।
पतितपावनमिति यशो विश्रुतं तत्
कथं प्रतिरोधः प्रवेशे पुनर्नः ॥

क्रन्दमाना गतभर्तृकाः सकेशाः
आर्तरावं कोऽपि न श्रोतुकामः ।
हर्तुमार्तिं को विना पाण्डुरङ्ग
उत्सहेतेह नु दयापयोराशिः ॥

घोषितमसौ समदृष्टिपण्ढरीशः
कथं भेदान् मन्येत भक्तवृन्दे ।
दर्शनार्थे सर्वस्य विठ्ठलोऽयं
ततः प्रतिरोधं मा कुरुध्वमासाम् ॥

पुरोहितवर्गैः संमतं नचैतत्
सह्यतामथ दैवते कथमशुद्धिः ।
अशुचिशङ्कामीश्वरे कल्पयन्तः
जगद्वन्द्ये पावने देवपालाः ॥

वस्तु तस्मान्न्यायालये प्रविष्टं
शास्त्रवित् स ब्राह्मणः पूर्वपक्षी ।
देवशुचितां निर्णयन्ते नरा यन्
महानेवं बत दैवदुर्विलासः ॥

दैवतं कतिपयभक्तजनपरस्वं
कथं स्यादिति बहुजनो व्याकुलान्तः ।
सर्वशक्तिं परमेश्वरं पुनः कः
क्षमो रोध्दुं ननु नतानुग्रहे स्यात् ॥

पूर्वपक्षिमतं न चादृतं शास्त्रैः
पाण्डुरङ्गप्रतिपादनेन मान्यम् ।
धर्मरक्षां कुर्वीत विना तेन
प्राकृतः को निजधनव्ययेनैवम् ॥

१९

स्वातन्त्र्यपूर्वसमये विदुषां गुणानां
राजाश्रयो न विदितः परकीयराज्ये ।
आङ्ग्लैः सहानुमतिका ननु मानितास्तैः
लोकादराश्रयवतां न नृपाश्रयस्तु ॥

स्वातन्त्र्यलिप्सुसुजनाः परराज्ययन्त्रैः
सख्यं कथं हि परियत्नपरं वृणीयुः ।
स्वातन्त्र्यलाभजनिते जनराज्यकाले
सर्वं प्रभिन्नमधुना मम राष्ट्रभाग्यम् ॥

ज्ञात्वा सदोद्यमरतं मतिसुप्रकर्षं
धर्मज्ञपण्डितमिमं नयपारगं च ।
ते शासकाः सततलोकहितैकदक्षं
न्यायोजयन् सपदि राज्यसभासदस्यम् ॥

धर्मप्रशासिनियमान् विधिपुस्तकेषु
संस्तम्भितुं कृतमनेन सुदीर्घकार्यम् ।
विद्यानयप्रतिनिधित्वमियद्विधाय
षड्वर्षभूषितपदादधुना निवृत्तः ॥

२०

यदि राज्यसभायां नियुक्तिरेतस्य कृता
न त्वध्ययनरुचेर्वृत्तिस्तत्कार्यरता ॥

धर्मशास्त्रनिर्बन्धादौ जीवनकार्यं
प्रविसृज्येदानीं राजकारणं ग्राह्यम् ॥

ननु कथं रोचते कार्यत्यागश्चायं
धर्मशास्त्रमाह्वयते पुनरप्यनिवार्यम् ॥

तच्छासकवर्गैर्ज्ञात्वा मनसो भावं
निर्णीतं हि वरं तत्संशोधनकार्यम् ॥

राष्ट्रीयप्राध्यापकत्वपदनिर्माणं
कृत्वा तस्याभूत्तत्र नियुक्तस्थानम् ॥

अधुनासौ संशोधनाय परिबद्धकरः
इतिहासो भव्यो धर्मशास्त्रगः सुकरः ॥

ननु लक्षपादपङ्क्तयो मुद्रणीयास्ताः
निर्विघ्नं कार्ये शक्तिरथ स्याद्विहिता ॥

अननुभूतसन्मानोऽयं राज्याश्रयतः
अनुरूपव्यक्तेः सर्वसज्जनैर्हि मतः ॥

२१

पञ्चविंशतिक्रमः प्रदेशे प्रवेशदपरीक्षणेऽर्जितः
शिष्यवृत्तिपारितोषिकाणि च विद्यालयकाले हि ततः ॥

विल्सनविद्यालये सजुष्ट्वं संस्कृतभाषाविषयपरं
झालावेदान्तीयमानवान् पूर्वमेव गदितं सकलम् ॥

स्थितः प्रदेशे प्रथमक्रमतः शैक्षणिकपरीक्षणद्वये
पर्यवेक्षकीं वृत्तिमर्जितां हित्वा वृत्तिर्हिता नये ॥

द्वितीयपदवी निर्बन्धीया द्वात्रिंशद्वयसाधिगता
सत्यनयप्रतिपादनकार्ये प्राप्ता विजया नच गणिताः ॥

महामहोपाध्यायोपाधिः परकीयैरपि राज्यकरैः
एकषष्टिवयसश्च वितीर्णा गुणस्थानविज्ञानपरैः ॥

दक्षिणविद्यालयस्य पूर्वाध्यायिसमाजेन सत्कृतः
सन्मान्यसदस्यत्वं दत्वा कृतज्ञताभावो व्यक्तः ॥

राजप्राच्यसमाजस्यायं प्रकाशनार्थे स्वयं वृतः
सम्पादकपदभूषणभूतः प्राज्ञसंमतो ज्ञानयुतः ॥

प्राच्यज्ञानप्राज्ञसमित्यां भारतसंघधुरीणत्वम्
पारिस–इस्तंबूल–केंब्रिजस्थानेष्वमुना संविहितम् ॥

भारताफ्रिकाविद्याशाला लंडननगरे प्रतिष्ठिता
सन्मान्यसजुष्टभाग् हि तस्या भारतीय एकोऽयमितः ॥

नागपत्तने प्राच्यपरिषदो वृतो वुधैरध्यक्षपदे
इतिहाससभाध्यक्षो जातो वाल्टेरपुरे प्राज्ञमुदे ॥

लॉनाम्ना हितचिन्तकेन खलु काणेनामा हेमपटः
त्रैवार्षिकदानाय रक्षितः सन्मानो बहुमान्य इतः ॥

भारतीयविद्यासंशोधनसमितौ परियोजितः स्थितः
साहित्य–अकादमी–स्थापने कार्यकरोऽसौ हि प्रमुखः ॥

साहित्य–अकादमीप्रदत्तं पारितोषिकं ग्रन्थाय
देशे विहिता शब्द–योजना ह्यनेन गौरवमानाय ॥

राज्यकर्तृभिर्निवृत्तिदानं सर्वायुःपर्यन्तपरं
वितीर्णमस्मिंस्ततो नियुक्तः प्राध्यापकपीठे च वरम् ॥

अपरे सन्मानाः परिकथिता इतरत्र मया संदर्भात्
धार्मिकशास्त्रेतिहासरचना सर्वेषां श्रेष्ठा भवतात् ॥

सत्कारैरथ मनुजयोग्यता न निश्चिता भवतीह पुनः
जनयति सन्मानान् हि महत्ता सा प्रथितास्तु च हृदये नः ॥

२२

स्वाध्यायमग्नं विदग्धस्य चेतः
प्रेम्णा प्रपूर्णं सरिद्वत्सदा ।
कन्यात्रयं प्रीतिसंवर्धितं तत्
पुत्रौ तथा प्रेमभाजौ हि तौ ॥

जामातरौ द्वौ प्रतिष्ठास्वतन्त्रौ
कन्या तृतीया भिषक् कीर्तिता ।
शास्त्रज्ञवृत्ती सुतौ कीर्तिमन्तौ
न न्यूनमेतस्य संसारिणः ॥

प्रीतो मधुस्वादतो नित्यमेषः
जाग्रन् दिवा स्वल्पनिद्रो निशि ।
एतं समागच्छतेति ब्रुवंस्त्वं
याया व्रजेन्नावधिर्मे वदन् ॥

ऋजुता शिशोरेव विमलान्तरीया
आप्तैर्वृतः स्यात्प्रहृष्टो हृदि ॥

२३

ब्रुवन्ति बहवः कार्ये न कृते
शरीरदौर्बल्यादि कारणम्
श्राम्यति देहो विकलं गात्रं
कथं संभवेन्महत्साधनम् ॥

स्वास्थ्याभावाद्वर्षं विगतं
शिशोरस्य पञ्चदशाब्दस्य ।
गतो न शालां, न पुनर्नष्टा
स्वाध्यायप्रीतिर्बहलास्य ॥

द्वितीयविद्यालयीनायने
हिमज्वरोऽस्याकस्मादुदितः ।
सशङ्कमनसश्चाप्तवयस्या
नायं मेरुः पुनर्विचलितः ॥

चत्वारिंशत्संवत्सरगो
जठरातङ्को दुष्टविकारः ।
न कार्यनाशो न चायमलस
उद्यमगुटिकाकृतो निर्भरः ॥

हृदयविकारस्य चिन्तयास्य
भिषग्वरा ननु विचलिचित्ताः ।
धर्मशास्त्ररतविदुषश्च कुतो
भीतिः शङ्कितमथवा चिन्ता ॥

स्थितिं गतिं वचनं च वाचनं
दृष्ट्वा कोपि न समुच्चारयेत् ।
दुर्बलशब्दं, शब्ददुर्बलः
साश्चर्यं हि पुनर्विलोकयेत् ॥

मा भूद्देहो हेतुरिदानीं
कार्याभावे कस्यापि पुनः ।
एवं कार्यं यदि संभाव्यं
जातु दुर्बलं भवतु वपुर्नः ॥

२४

ननु सौम्यमिदं दर्शनं–सम्यग्धर्मशास्त्रपावनम् ॥

तदिदं परिशीलनमन्दिरं
पश्यतु भवांस्तदभ्यन्तरं
ग्रन्थान् रचितान् नु निरन्तरं
तन्मध्यस्थितमध्ययने रतममुं स्वीकृतासनम् ॥

आगम्यतामिति च सस्मितं
भवतो भवेद्धि सुस्वागतं
निजपरभावपदं विस्मृतं
स्नेहोन्नीतिः शाश्वतरीतिर्वयस्यवद्वर्तनम् ॥

अन्तर्बाह्यैकात्म्यं सदा
संभाषणे न विरतिः कदा
वदने नृत्यति ननु शारदा
कुर्वीत कथाभरः सर्वथा भवन्मनोरञ्जनम् ॥

क्रान्ता नवखण्डेयं धरा
नित्यं स्थितोन्नता कंधरा
अनुभूतिः सा विविधस्तरा
अब्धिगभीरा शैलविस्तरा वितरति तेजोधनम् ॥

गर्वेणाधिगतो नाश्रयः
निर्व्याजान्तःकरणप्रियः
प्रतिपादितो हि नित्यं नयः
स्पष्टभाषणं कष्टजोषणं चरणं निर्याचनम् ॥

शश्वद् ग्रन्थाध्ययने रतिः
स्फटिकानुकारिविशदा मतिः
निखिला हितदा महिता कृतिः
तेजसे नराकृतिने सुतरामस्तु सदा वन्दनम् ॥

मराठी ग्रंथ संग्रहालय ठाणे. स्थळ
अनुक्रम ............ दि ......
क्रमांक ............ नों: दि: ......

२५

वारिबिन्दुगणने कोपि न वारिधेः समर्थः
व्योमगामितेजश्चयने श्रमो भवेद् व्यर्थः ॥

सर्वमायुरनलसमेतद् धर्मकार्यनिहितं
निन्दया मनो न व्यथितं, शंसने न चलितं
लोकहितध्येयैकतया विततमस्य चरितं
कथं तथा गीतिव्यक्तः संभृतगुणसार्थः ॥

देवताप्रसादप्रयुतो मानवैरगम्यः
शैलनिर्झरीयप्रवहः स्रवति मधुररम्यः
भार्गवस्य तेजोंऽशोऽयं प्राकृतैः प्रणम्यः
जीवनेऽतिवाहित एवं सर्वः पुरुषार्थः ॥

याचितव्यमेतस्य पुनः किं प्रियवरदानं
शताधिकं जीवतु धन्यो जगति वयोमानं
जनसेवामुखरं भूयाच्छ्रेयसेऽस्य वचनं
स्यादथ वा न स्यात्स्वार्थो भवतु हि परमार्थः ॥

• • •

मराठी ग्रंथ संग्रहालय ठाणे
ग्रं. क्र. ९९२८०

# CHRONOLOGICAL INDEX

## OF THE EVENTS IN THE LIFE OF

### M. M. Prof. Dr. P. V. Kane M. A., LL. M., D. Litt.

### referred to in the Text.

| Year | | Event | Referred to in Song no. |
|---|---|---|---|
| 1880 | (7th May) | Born at Shri Kshetra Parasurama Dist. Ratnagiri | 3 |
| 1895 | | First long illness. | 23 |
| 1896 | | Marriage. | 4 |
| 1897 | | Matriculation. | 4, 5, 21 |
| 1898 | | Previous Examination, Wilson College, Bombay. | 5 |
| 1899 | | Intermediate Arts Examination. | 5 |
| 1901 | (i) | B. A.; Won Bhau Daji Prize. | 5 |
| | (ii) | Fellow, Wilson College. | 21. |
| 1902 | | First LL.B. | 5 |
| 1903 | | M. A.; Won Zala Vedanta Prize. | 5, 21. |
| 1904 | | A teacher at Ratnagiri. | 5 |
| 1905 | (i) | Passed S. T. C. | 5, 21. |
| | (ii) | Won Mandlik Prize for an essay on ' Manners and Morals in Epics '. | 5 |
| 1906 | (i) | Honours Examination in teaching. | 5, 21. |
| | (ii) | Won Mandlik Gold Medal for the essay on ' History of Alamkaras '. | 5 |
| 1907 | | Teacher in Elphinstone High School, Bombay. | 6 |
| 1908 | | Second LL. B. | 21. |
| 1909 | | worked as Professor of Sanskrit in the Elphinstone College, Bombay. | 7 |
| 1910 | | Published 'Sahitya Durpana' and 'Gadyavali' | 8 |
| 1911 | (i) | Published ' Kadambari '. | 8 |
| | (ii) | Granted ' Sanad ' by the High Court at Bombay as Vakil. Started practising as Vakil in Bombay. | 8 |
| 1912 | | LL. M. | 8, 21. |

आ. नं. स्थळप्रत
अनुक्रम
क्रमांक
नि.
नों. दि:

| | | |
|---|---|---|
| 1913–16 | Conducted a Law Class. | 8 |
| 1913 | Member of the Board of Studies in Sanskrit, University of Bombay. | 15 |
| 1917–1923 | Worked as Professor in the Government Law College, Bombay, | 8 |
| 1926 | Dharma Nirnaya Mandal established. | 10 |
| 1918–27 | President, managing committee Brahmana Sabha. | 14 |
| 1919–28 | Fellow, University of Bombay | 15 |
| 1927–48 | Trustee, Brahmana Sabha | 14 |
| 1930–(approx) | Editor, Journal of the Bombay Branch of the Royal Asiatic Society. | 21 |
| 1930 | Published Volume I of the History of Dharmasastra. | 16 |
| 1933 | Deccan College of Poona closed down. | 11 |
| 1936 | Deccan College case goes to Court. | 11 |
| 1938 | The Deccan College case closed. | 11 |
| 1939 | Adopted Honorary Member of the Past Boys' Association of the Deccan College. | 21 |
| 1936–56 (approx) | Vice President of the Bombay Branch of the Royal Asiatic Society. | 13 |
| 1940–45 (approx) | Chairman. Educational Institute, Dapoli. | 9 |
| 1941 | Published Volume II of the History of Dharmasastra. | 16 |
| 1942 | Was granted the title 'Mahāmahopādhyāya' | 21 |
| 1946 | Published volume III of the History of Dharmasastra. | 16 |
| | President, Oriental Conference, Nagpur. | 21 |
| 1947— | President, Research Section of the Mumbai Marathi Grantha Sangrahalaya. | 12 |
| 1947-1949 | Vice Chancellor of the University of Bombay. | 15 |

| | | | |
|---|---|---|---|
| 1948 | | An official delegate to the Paris Session of the International Conference of Orientalists. | 21 |
| 1951 | (i) | Leader of the Govt. delegation to the Istambul Session of the International Congress of Orientalists. | 21 |
| | (ii) | Prof. Law Institutes the M. M. P. V. Kane Gold Medal to be awarded every third year to a research Scholar in specified subjects by the Bombay Branch of the Royal Asiatic Society. | 13, 21 |
| 1952 | | Honorary Fellow of the London school of Oriental and African Studies. | 21 |
| 1953 | (i) | President, Indian History Congress session at Waltair. | 21 |
| | (ii) | Published Volume IV of the History of Dharmasastra. | 16 |
| 1953–59 | | Member of Parliament in the Rajya Sabha. | 19 |
| 1954 | | Leaders of the Govt. delegation to the Cambridge session of the International Congress of Orientalists. | 21 |
| 1954–58 | | Member, Council of Sahitya Academy New Delhi. | 21 |
| 1956 | | Awarded the prize of Rs. 5000/- by the Sahitya Academy for the History of Dharmasastra, Vol. IV. | 21 |
| 1958 | (i) | Published Part I of Vol. V of the History of Dharmasastra. | 16 |
| | (ii) | Awarded Life Pension by the Government of India. @ Rs. 1500 P. A. | 21 |
| 1959 | (i) | Appointed Member, Indology Committee. | 21 |
| | (ii) | Appointed National Research Professor of Indology. | 20, 21 |
| 1960 | | Amrita Mahotsava. | |

मराठी ग्रंथ सं... ठाणे. स्थळप्रत.
अनुक्रम २५००२ वि काव्य
क्रमांक १८८८ नों: दि: २१।८।८०

REFBK-0011260

REFBK-0011260